अभिजितोऽपत्यम् इत्यण्, तदन्ताद् यञ् । आभिजित्यः, आभिजित्यौ, आभिजिताः । वैदभृत्यः, वैदभृत्यौ, वैदभृताः । शालावत्यः, शालावत्यौ, शालावताः । [1]शैखावत्यः । शामीवत्यः । [2]और्णावत्यः । श्रौमत्यः[3] । गोत्रप्रत्ययस्यात्राणो ग्रहण[4]मिष्यते । आभिजितो मुहूर्तः, आभिजितः [5]स्थालीपाकः इत्यत्र न भवति ॥

## ञ्यादयस्तद्राजाः । (११९/२०७२)

'पूगाञ् ञ्योऽग्रामणीपूर्वात्' (५.३.११२/२०६६) इत्यतः प्रभृति ये प्रत्ययाः[6], ते [7]तद्राजसञ्ज्ञा भवन्ति । तथा चैवोदाहृतम् । तद्राजप्रदेशाः – तद्राजस्य बहुषु (२.४.६२/११९३) इत्येवमादयः ॥

इति [8]श्रीजयादित्यविरचितायां काशिकायां वृत्तौ

पञ्चमाध्यायस्य तृतीयः पादः

----०----

1. शैखावत्यः शैखावत्यौ शैखावताः ह, शिखावत्यः शिखावत्यौ शिखावताः क. 2. और्णावत्यः और्णावत्यौ और्णावताः क. ह. 3. श्रौमत्यः श्रौमत्यौ श्रौमताः क. ह. 4. इहेष्यते ह. 5. स्थालिकः ह. 6. विहिताः इत्यधिकम् क. ड. 7. तद्राजसञ्ज्ञकाः क. फ. 8. श्रीजयादित्यविरचितायां नास्ति ब. क, वामनविरचितायां ड.